# Shri Ramakrishna Stotradashakam

# શ્રીરામકૃષ્ણસ્તોત્રદશકમ્

## Document Information

Text title : Shri Ramakrishna Stotradashakam

File name : rAmakRRiShNastotradashakam.itx

Category : deities_misc, gurudev, rAmakRiShNa, dashaka, stotra

Location : doc_deities_misc

Author : Virajananda

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીરામકૃષ્ણસ્તોત્રદશકમ્

બ્રહ્મ-રૂપમાદિ-મધ્ય-શેષ-સર્વભાસકં
 ભાવષટ્કહીનરૂપ નિત્યસત્યમદ્વયમ્ ।
વાઙ્મનોઽતિ-ગોચરઞ્ચ નેતિ-નેતિ ભાવિતં
 તં નમામિ દેવ-દેવ-રામકૃષ્ણમીશ્વરમ્ ॥ ૧॥

આદિતેય ભીહરં સુરારિદૈત્યનાશકં
 સાધુ-શિષ્ટ-કામદં મહીસુભાર હારકમ્ ।
સ્વાત્મરૂપતત્ત્વકં યુગે યુગે ચ દર્શિતં
 તં નમામિ દેવ-દેવ રામકૃષ્ણમીશ્વરમ્ ॥ ૨॥

સર્વ-ભૂત-સર્ગ-કર્મ-સૂત્ર-બન્ધ કારણં
 જ્ઞાન-કર્મ-પાપ-પુણ્ય-તારતમ્ય સાધનમ્ ।
બુદ્ધિ-વાસ-સાક્ષિ-રૂપ-સર્વ-કર્મ-ભાસનં
 તં નમામિ દેવ-દેવ-રામકૃષ્ણમીશ્વરમ્ ॥ ૩॥

સર્વ-જીવ-પાપ-નાશ કારણં ભવેશ્વરં
 સ્વીકૃતં ચ ગર્ભવાસ દેહ પાપમીદૃશમ્ ।
યાપિતં સ્વલીલયા ચ યેન દિવ્યજીવનં
 તં નમામિ દેવ-દેવ-રામકૃષ્ણમીશ્વરમ્ ॥ ૪॥

તુલ્ય લોષ્ટ-કાઞ્ચનં ચ હેય નેય ધીગતં
 સ્ત્રીષુ-નિત્ય-માતૃરૂપ શક્તિભાવ ભાવુકમ્ ।
જ્ઞાનભક્તિ ભુક્તિ મુક્તિ શુદ્ધ બુદ્ધિ દાયકં
 તં નમામિ દેવ-દેવ-રામકૃષ્ણમીશ્વરમ્ ॥ ૫॥

સર્વ-ધર્મ-ગમ્યમૂલ-સત્ય-તત્ત્વ-દેશકં
 સિદ્ધ સર્વ સમ્પ્રદાય સામ્પ્રદાય વર્જિતમ્ ।
સર્વશાસ્ત્રમર્મદર્શિ સર્વ વિન્નિરક્ષરં
 તં નમામિ દેવ-દેવ-રામકૃષ્ણમીશ્વરમ્ ॥ ૬॥

ચારુદર્શ-કાલિકા સુગીત-ચારુ-ગાયકં
    કીર્તનેષુ મત્તવચ્ચ નિત્ય-ભાવ વિહ્વલમ્ ।
સૂપદેશ-દાયકં હિ શોક-તાપ-વારકં
    તં નમામિ દેવ-દેવ-રામકૃષ્ણમીશ્વરમ્ ॥ ૭॥

પાદ-પદ્મ-તત્ત્વ-બોધ-શાન્તિ-સૌખ્ય-દાયકં
    સક્તચિત્ત-ભક્ત-સૂનુ-નિત્ય-વિત્તવર્દ્ધકમ્ ।
દમ્ભિ-દર્પ-દારણં તુ નિર્ભયં જગદ્ગુરું
    તં નમામિ દેવ-દેવ-રામકૃષ્ણમીશ્વરમ્ ॥ ૮॥

પઞ્ચવર્ષ બાલભાવ યુક્તહંસરૂપિણં
    સર્વલોકરઞ્જનં ભવાબ્ધિ સઙ્ગ ભઞ્જનમ્ ।
શાન્તિ-સૌખ્ય સદ્મજીવ જન્મભીતિ નાશનં
    તં નમામિ દેવ-દેવ-રામકૃષ્ણમીશ્વરમ્ ॥ ૯॥

ધર્મહાનહારકં ત્વધર્મકર્મવારકં
    લોકધર્મચારણં ચ સર્વધર્મકોવિદમ્ ।
ત્યાગિ ગેહિ સેવ્ય નિત્ય પાવનાઙ્ઘ્રિ પઙ્કજં
    તં નમામિ દેવ-દેવ-રામકૃષ્ણમીશ્વરમ્ ॥ ૧૦॥

સ્તોત્ર-શૂન્ય-સોમકં સદીશ-ભાવ-વ્યઞ્જકં
    નિત્ય-પાઠકસ્ય વૈ વિપત્તિ-પુઞ્જ-નાશકમ્ ।
સ્યાત્ કદાપિ જાપ યાગ-યોગ-ભોગ-સૌલભં
    દુર્લભં તુ રામકૃષ્ણ-રાગ-ભક્તિ-ભાવનમ્ ॥ ૧૧॥

ઇતિ શ્રીવિરજાનન્દરચિતં ભક્તિસાધકમ્ ।
સ્તવસારં સમાપ્તં વૈ શ્રીરામકૃષ્ણ તૂણકમ્ ॥ ૧૨॥

Proofread by Aruna Narayanan

*Shri Ramakrishna Stotradashakam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*